योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०४३

त्रिचत्वारिंशः सर्गः ४३

श्रीवसिष्ठ उवाच ।

एतदुक्तं परं तेन स्वयमेव च वेद्म्यहम् ।

राम त्वमपि जानीषे यथेदं समवस्थितम् ।। १

यत्रालीकमलीकेन किलालीके विलोक्यते ।

तस्यां संसारमायायां किं सत्यं किमसन्मयम् ।। २

यथा येन विकल्पेन यद्विकल्पेन कथ्यते ।

तथा तेनात्मकल्पेन नगताऽप्यनुभूयते ।। ३

यथा द्रवत्वं पयसि यथा स्पन्दो नभस्वति ।

यथा नभसि शून्यत्वं तथा सर्गत्वमात्मनि ।। ४

ततः प्रभृति तेनैव क्रमेणार्चनमात्मनः ।

अद्य यावद्गतव्यग्रः कुर्वन्नहमवस्थितः ।। ५

अनेनार्चाविधानेन मयेमे राम वासराः ।

अखिन्नेनातिवाह्यन्ते व्यवहारपरा अपि ।। ६

यथाप्राप्तैः क्रियाचारकुसुमैरात्मनोऽर्चनम् ।

व्युच्छिन्नमपि व्युच्छिन्नं न कदाचिदहर्निशम् ।। ७

ग्राह्यग्राहकसंबन्धे सामान्ये सर्वदेहिनाम् ।

योगिनः सावधानत्वं यत्तदर्चनमात्मनः ।। ८

दृष्ट्यानया रघुपते सङ्गमुक्तेन चेतसा ।

संसारविरलारण्ये विहरास्मिन्न खिद्यसे ।। ९

दुःखे महति संप्राप्ते धनबन्धुवियोगजे ।

एतां दृष्टिमवष्टभ्य विचारं कुरु सुव्रत ।। १०

सुखदुःखे न कर्तव्ये धनबन्धूदयक्षये ।

एवंप्राया एव सर्वा नित्यं संसारदृष्टयः ।। ११

जानास्येव गतिं चित्रां विषयाणां प्रमाथिनीम् ।

यथायान्ति यथा यान्ति यथा परिभवन्ति च ।। १२

एवमेव प्रवर्तन्ते प्रेमाणि च धनानि च ।

एवमेवावहीयन्ते निमित्तैरविचारितैः ।। १३

न तास्तव न तासां त्वं निर्मलान्तर्जगत्क्रियाः ।

इदमित्थं जगत्किंचित्किं मुधा परितप्यसे ।। १४

त्वमिहासि जगद्रूपं चिन्मात्रवितताकृते ।

निजावयवकावृत्तौ कः क्रमो हर्षशोकयोः ।। १५

तात चिन्मात्ररूपोऽसि न ते भिन्नमिदं जगत् ।

अतस्तव कथं कुत्र हेयोपादेयकल्पना ।। १६

इति चिच्चक्रचाञ्चल्ये चिन्मये जगदम्बुधौ ।

तरङ्गजाले चाम्भोधौ कः क्रमो हर्षशोकयोः ।। १७

चिदेकतानतामेत्य सौषुप्तीमागतः स्थितिम् ।

अद्यप्रभृति राम त्वं तुर्यावस्थात्मको भव ।। १८

समः समसमाभासो भास्वद्वपुरुदारधीः ।

तिष्ठात्मार्चारतो नित्यं परिपूर्ण इवार्णवः ।। १९

एतत्त्वं श्रुतवान्सर्वं स्थितस्त्वं परिपूर्णधीः ।

यदिच्छसीतरत्प्रष्टुं तत्पृच्छ रघुनन्दन ।।

यत्पृष्टं प्रथमे कल्पे तदद्य परिचोदय ।

श्रीराम उवाच ।

इदानीं संशयो ब्रह्मन्विनिवृत्तो विशेषतः ।। २१

ज्ञातं ज्ञातव्यमखिलं जाता तृप्तिरकृत्रिमा ।

न मुनेऽस्ति मलं द्वित्वं न चेत्यं न च कल्पनम् ।।२२

तदा ममाभूदज्ञानं प्रशान्तमधुना तु तत् ।

कलङ्क आत्मनोऽस्तीति तदज्ञानवशेन या ।। २३

भ्रान्तिरासीदिदानीं सा निवृत्ता त्वत्प्रसादतः ।

न जायते न म्रियते न चैवात्मा कलङ्कितः ।। २४

सर्वं च खल्विदं ब्रह्ममयमित्युदितोऽस्म्यलम् ।

प्रश्नेभ्यः संशयेभ्यश्च वाञ्छितेभ्यश्च सर्वतः ।। २५

शुद्धं मे निर्मलं चेतस्त्वष्ट्रा यन्त्रभ्रमादिव ।

सर्वाचारोपदेशेषु प्राप्तप्रोक्तेषु साधुभिः ।। २६

निराकाङ्क्षी स्थितोऽस्म्यन्तः सुमेरुः कनकेष्विव ।

न तदस्त्यस्ति यत्राशा न तदस्ति यदीप्सितम् ।।२७

न तदस्ति यदादेयं हेयं मध्यं चराचरे ।

इदं हेयमुपादेयमिदं सदिदमप्यसत् ।। २८

इति चिन्ताभ्रमः शान्तो निपुणं परमो मुने ।

न स्वर्गमभिवाञ्छामि द्वेष्मि वापि न रौरवम् ।। २९

आत्मन्येव हि तिष्ठामि मन्दराद्रिरिवाभ्रमः ।

कणशः कीर्णत्रिजगत्क्षीरसागरसंसृतिः ।। ३०

विश्रान्तश्चिरसंभ्रान्तो निर्भ्रमो राम मन्दरः ।

अवस्त्विदमिदं वस्तु पश्येति कलनास्त्यलम् ।। ३१

हृदि तस्य कुसंदेहजालेन ज्वलिताधिकम् ।

इदमित्थं जगदिति ज्ञातं येन मुनीश्वर ।। ३२

स यत्र याति कार्पण्यं जगतस्तन्न लभ्यते ।

विचित्राकुलकल्लोलाज्जडाद्वृत्तिविवर्जितात् ।। ३३

त्वत्प्रसादेन भगवंस्तीर्णाः स्मो भवसागरात् ।

संपदामवधिर्ज्ञातो दृष्टः सीमान्त आपदाम् ।। ३४

सर्वसारेऽप्यदीनाः स्मः पूर्णाः स्मः परमेश्वर ।

ययावभेद्यामपरैर्दलिताशामतङ्गजम् ।

संसारसागरे सम्यग्वीरतामागतं मनः ।। ३५

परिगलितविकल्पतामुपेतं

प्रगलितवाञ्छमदीनसारसत्त्वम् ।

त्रिजगति यदतिप्रसन्नरूपं

प्रमुदितमन्तरनुत्तमं मनो मे ।। ३६

इत्यार्षे श्रीवा०रामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० विश्रान्तिवर्णनं नाम त्रिचत्वारिंशः सर्गः ।।

४३ ।।